संस्कृत-वार्ता:
11.06.2024
सायम् - 06:20

## मुख्यवार्ता:

- नवघटितस्य केन्द्रीय-मन्त्रिपरिषदः मन्त्रिभिः अद्य निज-कार्यभारः सम्भालितः। एतेषु गृहमन्त्री अमित-शाहः, विदेश-मन्त्री डॉ. एस. जयशंकरः, कृषिमन्त्री शिवराजसिंह्-चौहानः, सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः च सम्मिलिताः सन्ति।
- विदेशमन्त्रालस्य पदभारग्रहणानन्तरं विदेशमन्त्री एस-जयशङ्करः अवदत् यत् प्रथमं भारतं वसुधैव कुटुम्बकम् इति भारतीय-विदेशनीतेः अनुगुणं केन्द्रप्रशासनं कार्यं करिष्यति।
- तेलुगु-देशम-पार्टीति दलस्य प्रमुखः एन. चंद्रबाबू नायडू आन्ध्र-प्रदेश-विधानसभायां राष्ट्रिय-जनतान्त्रिक-संयुतेः नेता प्रचितः।
- सर्वोच्च-न्यायालयेन अद्य ऐषमः नीट अर्थात् राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षायाः परिणामस्य अनन्तरं प्रवेशार्हता-प्रक्रियायां स्थगनं निराकृतम्।
- अद्य दोहायां पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य फीफा विश्वचषकस्पर्धा-पात्रतायै निर्णायक -द्वन्द्वस्य द्वितीय चक्रे भारतीय पादकन्दु दलम् एशियाई विजेता कतरं सम्मुखी करिष्यति।

## नूतनमन्त्रिणां कार्यग्रहणम्

प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे राष्ट्रिय-जनतान्त्रिक-संयुति-प्रशासनस्य नवघटितस्य केन्द्रीय-मन्त्रिपरिषदः मन्त्रिभिः अद्य निज-कार्यभारः सम्भालितः। एतेषु गृहमन्त्री अमित-शाहः, रक्षान्त्री राजनाथ-सिंहः, विदेश-मन्त्री डॉ. एस. जयशंकरः, कृषिमन्त्री शिवराजसिंह्-चौहानः स्वास्थ्य-मन्त्री जगत-प्रकाश-नड्डा सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः क्रीडा-युवा-प्रकरणानां मन्त्री मनसुख-मांडविया च सम्मिलिताः सन्ति। एतान् अतिरिच्य अन्ये अपि मन्त्रिणः अद्य आरभ्य मन्त्रालयेषु कार्यारम्भं कृतवन्तः। प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे राष्ट्रिय-जनतान्त्रिक-संयुति-प्रशासनस्य अयं तृतीयः कार्यकालः विद्यते। अवधेयं यत् गतदिने सञ्जाते मन्त्रिमण्डलीयोपवेशने मन्त्रालयानाम् आबण्टनं सञ्जातम्। अत्रान्तरे विदेशमन्त्रालस्य पदभारग्रहणानन्तरं विदेशमन्त्री एस-जयशङ्करः अवदत् यत् प्रथमं भारतं वसुधैव कुटुम्बकम् इति भारतीय-विदेशनीतेः अनुगुणं केन्द्रप्रशासनं कार्यं करिष्यति।

आन्ध्रप्रदेश-विधानसभा

तेलुगु-देशम-पार्टीति दलस्य प्रमुखः एन. चंद्रबाबू नायडू अद्य आन्ध्र-प्रदेश-विधानसभायां राष्ट्रिय-जनतान्त्रिक-संयुतेः नेता प्रचितः। विजयवाड़ायाम् टीडीपी जनसेना भाजपेति दलानां विधायकोपवेशने सर्वसम्मत्या नायडू विधायकदल-नेता चितः। जनसेना पार्टीति दल-प्रमुखः पीतापुरम आसनस्य विधायकः के.पवन-कल्याणः आन्ध्र-प्रदेश-विधानसभायां राष्ट्रिय-जनतान्त्रिक-संयुतेः नेतृ-रूपेण चंद्रबाबू नायडू इत्यस्य नाम्नः प्रस्तावम् उपस्थापयत्। यस्य राष्ट्रिय-जनतान्त्रिक-संयुतेः विधायकैः सर्वसम्मत्या समर्थनं कृतम्। आन्ध्र-प्रदेशे राष्ट्रिय-जनतान्त्रिक-संयुत्या चतु-ष्षष्ट्यधिकैक-शतं विधानसभासनेषु बहुमतम् अवाप्तम्।

नीट-परीक्षा-विवादः

सर्वोच्च-न्यायालयेन अद्य ऐषमः नीट अर्थात् राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षायाः परिणामस्य अनन्तरं प्रवेशार्हता-प्रक्रियायां स्थगनं निराकृतम्। न्यायालयेन मे मासस्य पञ्चमे दिने आयोजितायाः परीक्षायाः निरस्ती-करण-सम्बद्धायां याचिकायां राष्ट्रीय-परीक्षा- एजेंसी इत्यस्मात् अन्येभ्यश्च उत्तरम् अभियाचितम्। एतत् प्रकरणम् अपरया लम्बित-याचिकया सह संयोज्य अग्रिमं वादश्रवणं जुलाई मासस्य अष्टमे दिने भविष्यति। परीक्षायां कदाचारस्य अनैतिकतायाः च शीघ्रं गहनान्वीक्षणाय च छात्रैः याचिका प्रस्तुता विद्यते। अस्यां याचिकायां परिक्षायाः परिणामस्य प्रत्यावर्तनं विधाय नूतन-रीत्या परीक्षायोजनस्य अध्यर्थना कृतास्ति।

सिक्किम-विधानसभा

सिक्किमे सञ्जीत-खरेलः राज्य-विधानसभायाः कार्यवाहकाध्यक्षः नियुक्तः। राज्यपालेन लक्ष्मण-प्रसादाचार्येण अद्य गङ्गटोक-नगरे राजभवने तस्मै पद-गोपनीयतायाः शपथ-वचनं प्रतिज्ञापितम्। श्री-खरेलः एकादश्याः सिक्किम- विधानसभायाः उद्घाटन-सत्रस्य अध्यक्षतां करिष्यति। विधानसभायाम् असौ नामथांग रेटेपानी निर्वाचन-क्षेत्रस्य प्रतिनिधित्वं विदधाति। विधानसभायां नवनिर्वाचित-सदस्यानां शपथ-ग्रहण-समारोहे मुख्यमन्त्री प्रेम-सिंह-तमांगः मुख्य सचिवं समेत्य नैके गणमान्य-जनाः उपस्थिताः आसन्।

ओडिशा भाजपा

ओडिशायां भाजपेति दलं विधायक-दलस्य नेतुः चयनाय अद्य उपवेशनं करिष्यति। येन राज्यस्य नूतन-मुख्यमन्त्रिणः नियुक्तेः मार्गः प्रशस्तो भविष्यति । नूतन-मुख्यमन्त्री मन्त्रिपरिषत् च श्वः सायंकाले भुवनेश्वरस्य जनता-प्राङ्गणे शपथ-वचनं स्वीकरिष्यन्ति। नूतन-मुख्यमन्त्रिणः निर्वाचन-प्रक्रियायै केन्द्रीय-पर्यवेक्षकौ केन्द्रीय-मन्त्री राजनाथ-सिंहः भूपेन्द्र-यादवः च भाजपेति दलस्य विधायकैः सह चर्चां करिष्यतः।

दिल्लीजल-सङ्कटः

राजधान्यां नवदिल्ल्यां जल-सङ्कटं निध्याय उपराज्यपालः विनय-कुमार-सक्सेना हरियाणायाः मुख्यमन्त्रिणा नायब-सैनी इत्यमुना सह संवादम् अकरोत्। एकस्मिन् सामाजिक-सञ्चार-माध्यमे श्री-सक्सेना आवोचत् यत् हरियाणा-प्रशासनम् आश्वासयत् यत् तत् निर्धारित-मानकाधारेण जलं प्रदातुं सर्वविधं साहाय्यं करिष्यति। तत्रैव हरियाणायाः मुख्यमन्त्री अवोचत् यत् हरियाणा अपि निदाघतापेन दिल्लीम् इव जलसङ्कटं सम्मुखी करोति।

ऋतुसञ्चेतना

ऋतु-विज्ञान-विभागेन आगामि-त्रि-चतुर्दिवसेषु उत्तर-प्रदेश-हरियाणा-दिल्लीम् च समेत्य पूर्व-उत्तर-पश्चिम-भारतस्य कतिपय-भागेषु प्रबलापतपस्य ऑरेंज अलर्ट इति सञ्चेतना प्रसारिता। आकाशवाण्या सह संवादे ऋतुविज्ञान-विभागस्य वरिष्ठ-वैज्ञानिकः डॉ. आर-के-जेनामणिः अवोचत् यत् प्रबलोष्णता पुनः आरब्धा। मुख्य-रूपेण उत्तर-प्रदेशे दिल्ल्यां च प्रवृत्ता भविष्यति। अमुनोक्तं यत् तापमानं त्रिचत्वारिंशत् तः पञ्चचत्वारिंशत् मितं यावत् भवितुं सम्भाव्यते। दक्षिण-पश्चिम-प्रावृट्-विषये डॉ. जेनामणिः अवोचत् यत् प्रवृट् गुजरात-कोङ्कण-क्षेत्रे महाराष्ट्रस्य च कतिपय-भागेषु सम्प्राप्ता। यया केरल-कर्नाटक-कोङ्कण-क्षेत्राणां तटवर्ति-भागेषु प्रबलवृष्टेः सम्भवना वर्तते।

यूजीसी प्रवेशसानुमतिः

विश्वविद्यालयानुदानायोगेन उच्च-शिक्षण-संस्थानेषु आगामि-शैक्षणिक-सत्रात् छात्रेभ्यः एकस्मिन् वर्षे द्विवारं प्रवेशानुमतिं दातुं नीतिगत-निर्णयः स्वीकृतः। वर्तमान-समये विश्वविद्यालयानुदानायोगेः एकस्मिन् वर्षे एकस्मिन् एव शैक्षणिक-सत्रे प्रवेशस्य अनुमतिं ददाति। विश्वविद्यालयानुदानायोगस्य अध्यक्षः प्रोफेसर एम जगदीश-कुमारः अवोचत् यत् अनेन तेभ्यः छात्रेभ्यः अधिको लाभः भविष्यति येषां बोर्ड- परिक्षा-परिणामस्य

घोषणायां विलम्बो भवति। अथ च ये छात्राः स्वास्थ्य-समस्याभिः उत वा व्यक्तिगत- कारणैः प्रवेश-प्राप्तये असमर्थाः भवन्ति।

<u>पादकन्दुक</u>

अद्य दोहायां पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य फीफा विश्वचषकस्पर्धा-पात्रतायै निर्णायक -द्वन्द्वस्य द्वितीय चक्रे भारतीय पादकन्दु दलम् एशियाई विजेतारं कतरदलं सम्मुखी करिष्यति। प्रतिस्पर्धा भारतीय समयानुसार रात्रौ सपाद नववादने आरप्स्यते । निर्णायक द्वन्द्वस्य तृतीय चक्रं प्राप्तुं भारतं निजसमूहे शीर्ष द्वयोः स्थानयोः एकं प्राप्तव्यं एव भविष्यति। विशिष्टेस्मिन् द्वन्द्वे भारतीय दलस्य नेतृत्वं क्षेत्ररक्षकः गुरप्रीत सिंह संधू करिष्यति ।

।। इति वार्ता: ।।